मध्यकौमुदी

(००२)

फो. ३१

श्रीगणेसायेनमः

श्री

इस्यौध सुत्र मा अ[illegible] रुवर्णोम
ने १ फेर पङ्नह को एरी वा
मा [illegible] अकार फेफे एपडेको
कानहो ए

प्रत्याहारे श्रीनां
नृनग्रणे

उनर — १
हाते — ॥
सिमाफ्ना — १
दारवा — १॥
अनंतसावर — ॥
तोरिकोभिउ ॥
मा

श्रीगणेसायेनमः

म.कौ० श्रीगणेशाय नमः॥ श्रीसरस्वत्यै नमः॥ श्रीगुरुभ्यो नमः॥ नत्वा वरदराजः श्रीगुरून्भट्टोजि
१ दीक्षितान्॥ करोति पाणिनीयानां मध्यसिद्धान्तकौमुदीम्॥ अइउण्। ऋऌक्। एओङ्। ऐऔ
च्। हयवरट्। लण्। ञमङणनम्। झभञ्। घढधष्। जबगडदश्। खफछठथचटतव्। कपय्। श
षसर्। हल्। इति सूत्राण्यणादिसंज्ञार्थानि हकारादिष्वकार उच्चारणार्थः। लणमध्ये त्वित्संज्ञकः॥
हकारो द्विरुपात्तोयमटि शल्पि विवांछता॥ अर्हेणाधुक्षदित्यत्र द्वयोःसिद्धं भविष्यति॥ हलंत्यं॥ उ
पदेशेंत्यं हलित्स्यात्। उपदेश आद्योच्चारणम्॥ सूत्रेष्वदृष्टं पदं सूत्रांतरादनुवर्तनीयं सर्वत्र। अ
दर्शनं लोपः। प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात्। तस्य लोपः। तस्येतो लोपः स्यात्। णादयोर्णा(
द्यर्थाः॥ आदिरंत्येन सहेता॥ अंत्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात्। यथाऽणिति रामः १

षो ऽल्पप्राणो महाप्राणउदात्तोऽनुदात्तः स्वरितश्चेति । खरो विवाराः श्वासा अघोषाश्च । हशः संवारा नादा घ
षाश्च । वर्गाणां प्रथमतृतीयपंचमा यणश्चाल्पप्राणाः । वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्रा
णाः । कादयो मावसानाः स्पर्शाः । यणोऽन्तःस्थाः । शल ऊष्माणः । अचः स्वराः । ≍क ≍ख इति कखाभ्यां
प्रागर्धविसर्गसदृशो जिह्वामूलीयः । ≍प ≍फ इति पफाभ्यां प्रागर्धविसर्गसदृश उपध्मानीयः । अं
अः इत्यचः परावनुस्वारविसर्गौ । अणुदित्सवर्णस्य चाप्रत्ययः । प्रतीयमानोऽणुदिच्च सवर्ण
स्य संज्ञा स्यात् । अत्रैवाण्परेण णकारेण । कु चु टु तु पु एते उदितः । तदेवम् अ इत्यष्टादशानां संज्ञा । तथे
कारोकारौ । ऋकारस्त्रिंशतः । एवं लृकारोऽपि । एचो द्वादशानां । अनुनासिकाननुनासिकभेदेन

अतिचमेनिचनकारी पारिभाषा

न·कौमु· यवला द्विधा· ते नानुनासिकास्तेन द्वयोर्द्वयोः संज्ञा· परः संनिकर्षः संहिता· वर्णानामतिशयित अ॰ वर्णा॰
५ सन्निधिः संहितासंज्ञः स्यात्· हलोऽनन्तराः संयोगः· अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः पति
सुप्तिङन्तं पदम्· सुबन्तं तिङन्तं च पदसंज्ञं स्यात्॥ ॥ इति संज्ञाप्रकरणम्॥ ॥ इको यणचि·
इकः स्थाने यण् स्यादचि संहितायां विषये· सुधी उपास्य इति स्थिते· तस्मिन्निति निर्दिष्टे पूर्वस्य·
सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम्· स्थानेऽन्तरतमः· प्रसं
द्वे गे सति सदृशतम आदेशः स्यात्· सुध्य् उपास्य इति जाते· अनचि च· अचः परस्य यरो द्वे वा स्तो
न त्वचि· झलां जश् झशि· झलां जशः स्युर्झशि परे· इति धस्य दः· संयोगान्तस्य लोपः स्यात्· अलो सू॰
सू॰ संयोगान्तं यत्पदं तदन्तस्य लोपः १

न्तस्य· षष्ठीनिर्दिष्टोऽन्यस्यादेशः· इति लोपे प्राप्ते· परोऽन्तिमेऽघोषो वा क्वः· उत्तमसः·
मध्वरिः· धात्र्यंशः· लाकृतिः· एचोऽयवायावः· एचः क्रमात् अय् अव् आय् आव् ए
ते स्युरचि· यथासंख्यमनुदेशः समानाम्· समसंबंधिविधिर्यथासंख्यं स्यात्· हरये
विष्णवे· नायकः· पावकः· वांतो यि प्रत्यये· यादौ प्रत्यये परे ओ औ इत्येतौ वावौ स्तः· गव्य
म्· नाव्यम्· अध्वपरिमाणे च· गव्यूतिः· धातोस्तन्निमित्तस्यैव· यादौ प्रत्यये परेऽय
कारस्य चेद्वान्तादेशस्तर्हि तन्निमित्तस्यैव नान्यस्य· लव्यम्· अवश्यलाव्यम्· तन्नि
मित्तस्येति किम्· ओयते· औयत· क्षय्यजय्यौ शक्यार्थे· शक्यार्थे किम्· क्षेतुं जेतुं

१ ॥ यान्तादेशनिपातनार्थमिदम् अवश्य... अव्ययम्

म.ज़. योग्यंखेयंपापंजेपमम्नः कम्बलऽर्थे केतारः कौलीपुरितिपुंप्यो ऽश्वापयोस्मारिनं कस्यम् कैयमम
४ त् कयमाहमित्यर्थः अदेङ्गुणः अदेङ् गुणसंज्ञः स्यात् तपरस्तत्कालस्य तपरकालात्पूर्वो वा उ
च्चार्यमाणस्य समकालस्यैव संज्ञा स्यात् आद्गुणः अवर्णादिविपरे पूर्वपरयोरेको गुण आदेशः स्यात्
संहितायाम् उपेन्द्रः रमेशः गंगोदकम् उपदेशो ऽजनुनासिक इत् उपदेशो ऽजनुनासिको ऽजित्सं
ज्ञः स्यात् प्रतिज्ञानुनासिक्याः पाणिनीयाः लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रल
योः संज्ञा उरण्रपरः ऋ इति त्रिंशतः संज्ञेत्युक्तं न स्थानेयोऽण् स रपरः सन्नेव प्रवर्तते कृष्ण
र्द्धिः तवल्कारः लोपः शाकल्यस्य अवर्णपूर्वयोः पदांतयोर्यवयोर्वा लोपो ऽशिपरे पूर्वत्रा रामः
८

सिद्धम्· सपादसप्ताध्याय्यांप्रतित्रिपाद्यसिद्धात्रिपाद्यामपिपूर्वंप्रतिपरंशास्त्रमसिद्धम्· हर इह·
हरयिह· विष्णइह· विष्णविह· वृद्धिरादैच्· आदैच्चवृद्धिसंज्ञःस्यात्· वृद्धिरेचि· आदेचिपरेवृद्धि
रेकादेशःस्यात्गुणापवादः· कृष्णैकत्वम्· गंगौघः· देवैश्वर्यम्· कृष्णौत्कंठ्यम्· एत्येधत्यूठ्सु·
अवर्णादेजाद्योरेत्येधत्योरूठिचपरेपूर्व[illegible]स्थानेवृद्धिरेकादेशःस्यात्· पररूपगुणापवादः· उपैति
उपैधते· प्रष्ठौहः· एजाद्योःकिम्· उपेतः· माभवान्प्रेदिधत्· स्वादीरेरिणोः· स्वैरं· स्वैरी· स्वैरिणी· अक्ष
ादूहिन्यामुपसंख्यानं· अक्षौहिणीसेना· प्रादूहोढोढ्येषैष्येषु· प्रौहः· प्रौढः· प्रौढिः· प्रैषः· प्रैष्यः·
ऋतेचतृतीयासमासे· सुखेनऋतः· सुखार्तः· तृतीयेतिकिम्· परमर्तः· प्रवत्सतरकंबलवसना

दि· १

स·सु· र्लक्षणानामन्ते · प्रादीनित्याह · उपसर्गाः क्रियायोगे · प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः · प्र · परा · अप · सम्
५ अनु · अव · निस् · निर् · दुस् · दुर् · वि · आङ् · नि · अधि · अपि · अति · सु · उत् · अभि · प्रति · परि · उप · एते
प्रादयः · भूवादयो धातवः · क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः · उपसर्गादृति धातौ · अवर्णान्ता
दुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः · प्रार्छति · वा सुप्यापिशलेः · अवर्णान्तादुपसर्गादृका
रादौ सुब्धातौ परे वृद्धिर्वा · आपिशलिग्रहणं पूजार्थम् · अवोरताभ्यां वे · अवः पराभ्यां रेफऋ
काराभ्यां परे सुपरे हे वा स्तः · रतिप्राते · तोः वि · हेन · प्रार्षभीयति · प्रर्षभीयति · एङि पररूपम्
आदुपसर्गादेङादौ धातौ परे पररूपमेकादेशः स्यात् · प्रेजते · उपोषति · अवौ न्यादिटि · अया राम:
५

·सुबंतसमाप्तिः

धातूपसर्गयोः कार्यमन्तरङ्गं

अन्तादिवच्च

मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात् । शकंध्वादिषु पररूपं वाच्यम् । तच्च टेः । शकंधुः । कर्कंधुः । कुल
टा । सीमन्तः केशवेशे । सीमान्तोऽन्यः । मनीषा । हलीषा । लाङ्गलीषा । पतञ्जलिः । सारङ्गः पशुपक्षिणोः ।
सारङ्गोऽन्यः । आकृतिगणोऽयम् । एवे चानियोगे । क्वेव भोक्ष्यसे । अनियोगे किम् । तवैव । ओत्वोष्ठयोः
समासे वा । स्थूलोतुः । स्थूलौतुः । बिम्बोष्ठः । बिम्बौष्ठः । समासे किं । तवौष्ठः । ओमाङोश्च । ओमि आ
ङि चात्पररूपमेकादेशः । शिवायोन्नमः । शिवेहि । अकः सवर्णे दीर्घः । अकः सवर्णेऽचि परे दीर्घ
एकादेशः । दैत्यारिः । श्रीशः । विष्णूदयः । होतॄकारः । एङः पदान्तादति । पदान्तादेङोऽति परे पूर्वरूपमेका
देशः स्यात् । हरेऽव । विष्णोऽव । सर्वत्र विभाषा गोः । लोके वेदे चैङन्तस्य गोरति वा प्रकृतिभावः पदान्ते ।

म॰सु॰ ८ गोऽग्रं॰ गोग्रम्॰ एङः॰ तस्य किम्॰ चित्रग्वग्रम्॰ पदान्ते किम्॰ गोः॰ अनेकाल्शित्सर्वस्य॰ इति प्राप्ते॰ ङि
त्॰ ङिदनेकालप्यन्त्यस्यैव स्यात्॰ अवङ् स्फोटायनस्य॰ पदान्ते एङि॰ तस्य गोरवङ् वा॰ गवाग्रम्॰
पदान्ते किम्॰ गवि॰ इन्द्रे च॰ गोरवङ् इन्द्रे॰ गवेन्द्रः॰ व्यवस्थितविभाषया॰ गवाक्षः॰ दूराद्धूते च॰ दूरात्संबो
धने यो वाक्यस्य टेः प्लुतो वा॰ प्लुतप्रगृह्या अचि नित्यम्॰ एते प्रकृत्या स्युः॰ आगच्छ कृष्ण ३ अत्र
गौश्चरति॰ ह्रस्वं लघु॰ संयोगे गुरु॰ संयोगे परे ह्रस्वं गुरुसंज्ञं स्यात्॰ दीर्घं च॰ गुरु स्यात्॰ गुरोरनृ
तोऽनन्त्यस्याप्येकैकस्य प्राचाम्॰ दूरात्संबोधने पदान्तेऽन्त्यस्य ऋतोऽन्यस्यापि गुरोर्वा प्लुतः स्या
त्॰ [illegible] दे३वदत्त॰ देवद३त्त॰ देवदत्ता३॰ गुरोः किं॰ वकारादकारस्य माभूत्॰ अनृतः किम्॰ कृष्णा३ राम॰ ६

६

६

मतिशा बोध् स्यलंकेले बाराहेरा २

एकैकस्य स्थांपर्यायम्· ईदूदेद्द्विवचनं प्रगृह्यम्· ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात्· हरी एतौ· विष्णू इ
मौ· गंगे अमू· मतिबोधस्येति तु स्वार्थे यथा द्वौ बालो ध्यः· अदसो मात्· अस्मात्परावीदूतौ प्रगृह्यौ स्तः·
अमी ईशाः· रामकृष्णावमू आसाते· मात्किं· अमुकेऽत्र· असति माद्ग्रहणे एकारोऽप्यनुवर्तेत· चा
यो:सत्वे अद्रव्यार्थाश्चादयो निपातसंज्ञाः स्युः· प्रादयः· एतेऽपि तथा· चन्द्रपलक्ष्मणां च सर्वना
श्रयुज्यते· द्रव्यमित्युच्यते सोऽर्थो भेदेन विवक्षितः· निपात एकाजनाङ्· एकोऽज्निपात आङ्वर्ज्जो
प्रगृह्यः· इ इन्द्रः· उ उमेशः· वाक्यस्मरणयोरङित्· न· आ एवं नु मन्यसे· आ एवं किल तत्· अन्यत्र
ङित्· ईषदुष्णं· ओत्· ओदन्तो निपातः प्रगृह्यः· अहो ईशाः· संबुद्धौ शाकल्यस्येतावनार्षे· संबुद्धि

ओष्णं·

ल·सु·
७

निमित्तओकारो वाप्रगृह्यः अवैदिके इतौ परे· विष्णो इति· विष्णविति· विष्ण इति· मय उञो वो वा· म
यः परस्य उञो वो वा स्यादचि· किमु उक्तम्· किम्वुक्तम्· इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च· पदा
न्ता इको ह्रस्वा वा स्युरसवर्णेऽचि· ह्रस्वविधिसामर्थ्यान्न स्वरसंधिः· चक्रि अत्र· चक्र्यत्र· पदान्ताः
किम्· गौर्यौ· न समासे· वाप्यश्वः· ऋत्यकः· ऋति परे पदान्ता अकः प्राग्वत्· ब्रह्म ऋषिः· ब्र
ह्मर्षिः· पदान्ताः किम्· आर्छत्॥ ॥इत्यच्संधिः॥ ॥स्तोः श्चुना श्चुः· स्तोः सकारतवर्गयोः
शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः· हरिश्शेते· रामश्चिनोति· सच्चित्· शार्ङ्गिञ्ज
य· शात्· शात्परस्य तवर्गस्य चुत्वं न स्यात्· विश्नः· प्रश्नः· ष्टुना ष्टुः· स्तोः ष्टुना योगे ष्टुः·

राम
७

रामष्षष्ठः· रामष्टीकते· पेष्टा· तट्टीका· चक्रिण्ढौकसे· नपदान्ताट्टोरनाम्· पदान्ताट्टवर्गात्परस्य
स्तोः ष्टुर्न नाम· षट्सन्तः· षट्ते· पदान्तात्किम्· ईट्टे· टोः किम्· सर्पिष्टमम्· अनाम्नवतिनगरीणामुप
संख्यानात्· षण्णां· षण्णवतिः· षण्णगर्यः· तोःषि· नष्टुत्वं· सन्षष्ठः· झलां जशोऽन्ते· पदान्ते झलां ज
शः स्युः· वागीशः· यरोऽनुनासिकेऽनुनासिको वा· यरः पदान्तस्यानुनासिकेऽनुनासिको वा· एतन्मु
रारिः· एतद्मुरारिः· प्रत्यये भाषायां नित्यं· तन्मात्रं· चिन्मयं· तोर्लि· परसवर्णः· तल्लयः· विद्वां
ल्लिखति· तस्यानुनासिको लः· उदः स्थास्तंभोः पूर्वस्य· उदः परयोः स्थास्तंभोः पूर्वसवर्णः· तस्मा
दित्युत्तरस्य· पंचमीनिर्देशेन क्रियमाणं कार्यं वर्णांतरेणाव्यवहितस्य परस्य बोध्यम्· ...

कौ॰ सु
१५

देः परस्य · परस्य यद्विहितं तत्तस्यादेर्बोध्यम् · इति सस्य थः · झरो झरि सवर्णे · हलः परस्य झरो लो
पो वा सवर्णे झरि · खरि च · झलां चरः स्युः · इत्युदो दस्य तः · उत्थानं · उत्तंभनं · झयो होन्यतरस्यां · झ
यः परस्य हस्य वा पूर्वसवर्णः · नादस्य घोषस्य संवारस्य महाप्राणस्य हस्य तादृशो वर्गचतुर्थः ·
वाग्घरिः · वाग् हरिः · शश्छोटि · पदान्ताज्झयः परस्य शस्य छो वाटि · तच्छिवः · तच्शिवः · पदा
न्तात्किम् · विप्रश्नः · छत्वममीति वाच्यं · तच्छ्लोकेन · मोनुस्वारः · मान्तस्य पदस्यानुस्वारो हलि ·
हरिं वंदे · पदान्तस्य किं · गम्यते · नश्चापदान्तस्य झलि · नस्य मस्य चापदान्तस्य झल्यनुस्वारः ·
यशांसि · आक्रंस्यते · अनुस्वारस्य ययि परसवर्णः · शान्तः · वा पदान्तस्य · त्वङ्करोषि · त्वं क[illegible]रोमः

८

मद्वैपचक्षु मच ज्ञा भ शा भि निर्य म्नु प्रम॥ इ पा मा भि नर्न्नु के छन्वत्तो पागांवि कल्पमार

राषि। मो राजि समः क्वौ। क्विबंते राजतौ परे सम्रो मस्य मस्व स्यान्। सम्राट्। हे मपरे वा। मपरे हकारे परे मस्य मो वा। किम्ह्मलयति किंह्मलयति। यवलपरे यवला वा। किय्ँह्यः किंह्यः। किव्ँह्वलयति किंह्वलयति। किल्ँह्लादयति किंह्लादयति। नपरे नः। नपरे हकारे परे मस्य नो वा। किन्ह्नुते किंह्नुते। ङः सि धुट्। डात्परस्य सस्य धुड् वा। आद्यंतौ टकितौ। टित्कितौ यस्योक्तौ तस्य क्रमादाद्यंतावयवौ स्तः। षट्त्सन्तः षट्सन्तः। ङ्णोः कुक्टुक् शरि वा। स्तः। प्राङ्क्षष्ठः प्राङ्षष्ठः। सुगण्ट्षष्ठः सुगण्षष्ठः। नश्छ। नोंता स्वरस्य सस्य धुड् सन्तः सन्सः। शिं तुक्। नस्य पदांतस्य शे तुग्वा। सञ्छंभुः सञ्शंभुः। ङमो ह्रस्वादचि ङमुण्नित्यं। ह्रस्वात्परो यो ङ्णनः तदंतं यत्पदं तस्मात्परस्याचो नित्यं ङमुट्। प्रत्यङ्ङात्मा। सुगण्णीशः। सन्नच्युतः। अ समः सुटि। समो रुः सुटि॥ अत्रानुनासिकः पूर्वस्य तु वा। अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा। अ

॥०॥

५ भगवान्‌ दैसे पञ्च भि भि ई सो व लि या र

म॰कौ॰ ८

नुनासिकात्परोनुस्वारः। अनुनासिकं विहाय रोः पूर्वस्मात्परोनुस्वारागमः। खरवसानयोर्विसर्जनीयः
खरि अवसाने च पदान्तस्य रेफस्य विसर्गः। पुंकोकिलः। संस्कर्ता। संस्कर्ता। पुमः खय्यम्परे। अ
म्परे खयि पुमो रुः। पुंस्कोकिलः। पुंस्कोकिलः। नश्छव्यप्रशान्। अम्परे छवि नान्तस्य पदस्य रुः। विसर्ज
नीयस्य सः खरि। चक्रिंस्त्रायस्व चक्रिँस्त्रायस्व अप्रशान् किं। प्रशान्तनोति। पदान्तस्य किं। हन्ति। अम्परे
किं। सन्त्सरुः। खत्रुमुष्टिः। नॄन्पे। नॄन् इत्यस्य रुर्वा पे। कुप्वोः ≍क≍पौ च। कवर्गे पवर्गे च परे विसर्गस्य ≍क≍पौ
स्तः। चाद्विसर्गः। नॄँ≍पाहि। नॄं≍पाहि। नॄँः पाहि। नॄंः पाहि। नॄन्पाहि। सोपदादौ। विसर्गस्य सः स्याद् अपदाद्योः कु
प्वोः। पयस्पाशम्। यशस्कल्पं। यशस्कम्। यशस्काम्यति। अनव्ययस्येति वाच्यम्। प्रातः कल्पं। कास्कोरोरे
वेति वाच्यम्। नेह। गीः काम्यति। इणः षः। इणः परस्य विसर्गस्य षः। पूर्वविषये। सर्पिष्पाशम्। सर्पिष्कल्पं

रु॰ ८३

सर्पिष्कः। सर्पिष्काम्यति। कस्कादिषु च। इणुउत्तरस्यैव सर्गस्य षः स्यादन्यस्य तु सः। कस्कः। कौतस्कुतः। स
र्पिष्कुण्डिका। धनुष्कपालमित्यादि। आकृतिगणोऽयम्। तस्य परमाम्रेडितम्। द्विरुक्तस्य परमाम्रेडितं स्यात्
कानाम्रेडिते। कान्कान्स्य तराम्रेडिते। कांस्कान्। कांस्कान्। छे च। ह्रस्वस्य तेतुक्। अच्छ। आङ्माङ्भ्यां नु
क् छे। आच्छादयति। माच्छिदत्। दीर्घात् तु क् छे। म्लेच्छयति। पदांताद्वा। दीर्घात् पदांतात् छे वा। लक्ष्मी च्छु
लक्ष्मी छाया॥ इति हल्संधिः॥ ॥विसर्जनीयस्य सः। खरि। विसृष्टस्थाने। खपरे विसर्जनीयः। सपरे खरि
विसर्गस्य विसर्गो न त्वन्यत्। कः त्सरुः। घनाघनः। क्षोभणः। वासांसि। क्षौरिं। विसर्गस्य विसर्गो वा। हरिः शेते। हरिश्शे
ते। खर्परे शरि वा विसर्गलोपो वक्तव्यः। हरि स्फुरति। हरिः स्फुरति॥ हरिस्स्फुरति। ससजुषो रुः। पदांतस्य स
स्य सजुषश्च रुः स्यात्। अतो रोरप्लुतादप्लुते। अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति। शिवोऽर्च्यः। अ

पौ२:

१०

मध्य

नः किं। देवा अत्र। अतीति किम्। अश्व आगंता। अप्लुतान्तकिम्। सुहि सुश्रोता३ अत्र न्वसि। लुप्तस्यासिद्ध
त्वाद् नः परोयं। अप्लुतादिति विशेषणो न्तु। तस्य सामर्थ्यान्नास्तिहत्वं। तपरकरणस्यानुनासामर्थ्यदीर्घनिवृत्त्या
चरितार्थत्वात्। अप्लुतेति किम्। तिष्ठतु पय आ३ग्निदत्त। हशि च। तथा। हि वोयं पुः। भोभगो अघो अपूर्व
स्य योऽशि। एतत्पूर्वस्य रेफस्य यादेशोऽशि। देवा इह। भोस् भगोस् अघोस्। इति शांतानि पाताः। तेषां तत्त्वेय
त्वेव कृते। व्योर्लघुप्रयत्नतरः शाकटायनस्य। अशि पदान्ते। भो नो गार्ग्यस्य। ... अर्थम्। पदं
न स्यात् लघुप्रयत्नस्य यस्य वस्य च नित्यं लोपः। भो अत्र। लघुप्रयत्नतरपक्षे। भोयत्र। पदान्तस्य किम्। तो
यम्। हलि सर्वेषां भो भगो अघो अपूर्वस्य यस्य लोपः स्यात् हलि। भो देवाः। भगो नमस्ते। अघो याहि। दे
वा यांति। रोऽसुपि। अह्नो रेफादेशो न तु सुपि। अहरहः अहर्गणः असुपि किम्। अहोभ्याम्। अत्रा हनि

१०

एनां मान्यः पतितान् स्यष्य म्हतोमराटसाभैः

त्तिहत्वो हृपरात्रिरथंतरेषु हत्वं वा वाम्। अहोरूपम्। गतमहो रात्रिरेषा। एकदेशविकृतेन्यायेनाहोसंब
भहोरथंतरम्। अहरादीनापत्यादिषु वा रेफः। विसर्गोपवादः। अहर्पतिः। गीर्पतिः। धूर्पतिः। पक्षेविस
र्गोपध्मानीयौ। रिरिरेफस्य रेफे लोपः। पुनर्लोपे पूर्वस्य दीर्घः। रो रि। ढरेफयोर्लोपनिमित्तयोः पूर्वस्याणो
दीर्घः। पुनारमते। हरीरम्यः। शंभूराजते। अणः किं। तृढः। मनस् रथ इत्यत्र रुत्वे कृते हशि च उत्वे रो
रीति लोपे च बाधे। विप्रतिषेधे परं कार्यम्॥ तुल्यबलविरोधे परं कार्यं स्यादिति लोपे प्राप्ते: पूर्वत्रासिद्धमि
ति रोरीत्वस्यासिद्धत्वादुत्वमेव। मनोरथः। एतत्तदोः सुलोपोऽकोरनञ्समासे हलि। अककारयोरेतत्तदोर्यः सु
स्तस्य लोपो हलि न ञ्समासे न। एष विष्णुः। स शम्भुः। अकोः किम्। एषको रुद्रः। अनञ्समासे किम्। असः
शिवः। हलि किं। एषोऽत्र। सोचि लोपे चेत्पादपूरणम्॥ सइत्यस्य सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येव पू

...पतिना...

स॰कौ॰ र्थेन। समासानिर्दि, प्रम निम्॥ से षदा सह र्थो॥ शम:॥ इति विसर्गसंधि:॥ ॥अर्थवद् धातुरप्रत्ययः प्रातिपदि
कम्॥ धातुं प्रत्ययः प्रत्ययांतं ववर्जयित्वा अर्थवद् हूवद्रूपं प्रातिपदिकं स्यात्॥ कृत्तद्धितसमासाश्च॥ कृत्तद्धि
ता[illegible]न्तौ समासाश्च तथा स्युः॥ स्वौजसमौट् छष्टा भ्यां भिस् ङे भ्यां भ्यस् ङसि भ्यां भ्यस् ङसोसां ङ्योः सुप्॥ सु
औ जस् प्रथमा। अम् औट् शस् द्वितीया। टा भ्यां भिस् तृतीया। ङे भ्यां भ्यस् चतुर्थी। ङसि भ्यां भ्यस् पंचमी। ङस्
ओस् आम् षष्ठी। ङि ओस् सुप् सप्तमी॥ प्रातिपदिकात्॥ अंतादावंतात्प्रातिपदिकात् परे स्वादयः प्रत्य
याः स्युः॥ सुपः॥ सुपस्त्रीणि त्रीणि वचनान्येकश एकवचन द्विवचन बहुवचनसंज्ञानि स्युः। लोके ये द्विवचनै पु॰
कवचने। द्वित्वैकत्वयोरेते स्तः। विरामोऽवसानम्। वर्णानामभावोऽवसानसंज्ञं स्यात्॥ रुत्वविसर्गौ प्राग्वः
अयोगवाहानामस्योपरि शर्षु वा वाम्॥ यमानुस्वार विसर्गा जिह्वामूलीयोपध्मानीया अयोगवाहाः। ते ते

हविसर्गस्यायस्त्रौ त् । अ नवि वेति द्विवचने । रामः । सरूपाणामेकशेष एकविभक्तौ । एकविभक्तौ यानि स
रूपाण्येव दृष्टानि तेषामेक एव शिष्यते । प्रथमयोः पूर्वसवर्णः । अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदी
र्घ एकादेशः स्यात् । इति प्राप्ते । नादिचि । आदिचि न पूर्वसवर्णदीर्घः । वृद्धिरेचि । रामौ । बहुषु बहुवचनम् । चु
टू । प्रत्ययाद्यौ चुटू इतौ स्तः । विभक्तिश्च । सुप्तिङौ विभक्तिसंज्ञौ स्तः । न विभक्तौ तुस्माः । विभक्तिस्थास्तु सकारमका
नेतः । इति सस्य नेत्त्वम् । रामाः । एकवचनं संबुद्धिः । स्यात् । यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् । यः प्रत्ययो य
स्मात् क्रियते तदादि शब्दरूपं तस्मिन्नङ्गं स्यात् । एङ्ह्रस्वात्संबुद्धेः । एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते संबुद्धे
श्चेत् । हे राम । हे रामौ । हे रामाः । अमि पूर्वः । अकोऽम्यचि पूर्वरूपमेकादेशः । रामम् । रामौ । लशक्वतद्धिते । तद्धित
वर्जप्रत्ययाद्या लशकवर्गा इतः स्युः । तस्माच्छसो नः पुंसि । पूर्वसवर्णदीर्घात्परो यः शसः सस्तस्य नः पुंसि ॥

रि
अनादार
अर्थमा
पञ्चमि
संदङ्अर्थ
मा षष्ठि
अधिक
तौ अर्थ
मा सप्त
मी

अटुकुपाङुम्वावायेपि॥ एकवर्गपवर्ग आङ्नुम् एतैर्व्यस्तैर्यथासंभवंमिलितैश्चव्यवधानेपि रषा
भ्यां परस्य नस्य णः स्यात् समानपदे इति णत्वे। पदांतस्य॥ नत्वंतोन। रामान्। टाङसिङसामिनात्स्याः
अदन्तात् टादीनामिनादयः स्युः। णत्वं। रामेण। सुपि च। यञादौ सुप्यतोऽस्य दीर्घः। रामाभ्यां। अतो
भिस्स ऐस्। अनेकाल्शित्सर्वस्य। रामैः। ङेर्यः। अतोऽगात्परस्य ङेर्यादेशः॥ स्थानिवदादेशोऽनल्वि
धौ इति स्थानिवत्वात् सुपि चेति दीर्घः। रामाय। रामाभ्यां। बहुवचने झल्येत्। झलादौ बहुवचने सुप्य
तोऽस्य एकारः। रामेभ्यः। सुपि किम्। पचध्वम्। चावसाने झलां चलो वा। रामात्। रामाद्। रामाभ्यां।
[illegible]। रामेभ्यः। रामस्य। ओसि च। अतोऽस्य एकारः। रामयोः। ह्रस्वनद्यापो नुट् [illegible] ङसाम् [illegible] गुरुः
वंतात् आगात्परस्यामो नुडागमः। नामि। अजंतांगस्य दीर्घः। रामाणाम्। रामे। रामयोः। सुप्ये [illegible]। आदे

गप्रत्यययोः। इण्कुभ्यां परस्याः पदांतस्यादेशः प्रत्ययावयवश्च यः सस्तस्य मूर्द्धन्यादेशः। ईषद्विवृतस्य स

स्य तादृश एव षः रामेषु०। एवं कृष्णमुकुन्दादयः। सर्वादीनि सर्वनामानि। सर्व विश्व उभ उभय उतर उतम

अन्य अन्यतर इतर त्वत् त्व नेम सम सिम। पूर्व परावर दक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां

स्वमज्ञातिधनाख्यायाम्। अंतरं बहिर्योगोपसंव्यानयोः। त्यद् तद् यद्। एतद् इदम्। अदस् एक द्वि

युष्मद्। अस्मद् भवतु किम्। जसः शी। अदंतात् सर्वनाम्नो जसः शी अनेकाल्त्वात्सर्वादेशः। सर्वे। सर्वना

म्नः स्मै॥ अतः सर्वनाम्नो ङेः स्मै। सर्वस्मै। ङसिङ्योः स्मात्स्मिनौ० अतः सर्वनाम्नः एतयोरेतौ स्तः सर्वस्मा

त्। आमि सर्वनाम्नः सुट्। अवर्णान्तात्सर्वनाम्नो विहितस्यामः सुडागमः। एत्वषत्वे सर्वेषाम्॥ सर्वस्मि

न्। शेषं रामवत् एवं विश्वादयोप्यदंताः। उभशब्दो नित्यं द्विवचनांतः उभौ उभौ उभाभ्याम् ३ उभयोः २

नस्ते—

स·कौ·सु· नत्वेहपाठेः कृतार्थः । उतरउतमौ प्रत्ययौ प्रत्ययग्रहणे तदंतग्रहणमिति तदंता अप्याः । नेम इत्यर्द्धे । समः
सर्वपर्यायः तुल्यपर्यायस्तु नेः समानामिति ज्ञापकात् । पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्था
यामसंज्ञायाम् । एषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणसूत्रात्सर्वत्र या प्राप्ता सा जसि वा । पूर्वे पू
र्वाः । स्वाभिधेयापेक्षावधिनियमो व्यवस्था । व्यवस्थायां किम् । दक्षिणा गाथकाः कुशला इत्यर्थः । अस
ज्ञायां किम् । उत्तराः कुरवः । स्वमज्ञातिधनाख्यायाम् । ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्राप्ता संज्ञा जसि वा । स्वे:
स्वाः । आत्मीया । आत्मान इति वा । ज्ञातिधनवाचिनस्तु स्वाः । ज्ञातयोऽर्था वा । अंतरं बहिर्योगोपसंव्यानयोः ।
बाह्ये परिधानीये वार्थे अन्तरशब्दस्य प्राप्ता संज्ञा जसि वा । अंतरे अंतरा वा गृहा बाह्या इत्यर्थः । अंतरे अंत रामः
रा वा शाटकाः परिधानीया इत्यर्थः । पूर्वादिभ्यो नवभ्यो वा । सौ— ङसिङ्योः स्मात्स्मिनौ वा स्तः । पूर्वस्मात् ॥

मो १

पूर्वान्॥ पूर्वस्मिन्॥ पूर्वे। एवं परादीनामपि॥ शेषं सर्ववत्॥ संज्ञोपसर्जनीभूतास्तु न सर्वादयः॥ स
र्वो नाम कश्चित् तस्मै सर्वाय देहि॥ अतिक्रान्तः सर्वमति सर्वस्तस्मै अतिसर्वाय॥ अंतरमिति
गरास्त्रे·पुरीति वक्तव्यं॥ अंतरायां पुरि·तृतीयासमासे·सर्वनामत्वान·मासपूर्वाय।तृतीयासम
सार्थवाक्येपि न समासेन पूर्वाय·द्वंद्वे च।डकारसंज्ञान·वर्णाश्रमेतराणाम्॥ विभाषा जसि। [redacted]
[redacted]।वर्णाश्रमेतरे वर्णाश्रमेतराः॥ प्रथमचरमतयाल्पार्द्धकतिपयनेमाश्च॥ एते ज
स्युक्तसंज्ञा वा स्युः॥ प्रथमे प्रथमाः॥ तयप्रत्ययः॥ द्वितये द्वितयाः॥ शेषं रामवत्॥ नेमे·नेमाः॥ शे
षं सर्ववत्॥ तीयस्य ङित्सु वा॥ द्वितीयस्मै। द्वितीयाय। इत्यादि एवं तृतीयः॥ निर्जरः॥ जरायाः जर
सन्यतरस्याम्॥ जराया जरस् वा॥ न्ताः दौ विभक्तौ पदांगाधिकारे तस्य च तदंतस्य च·निर्दिश्यमा

न

म.कौ. १४

नस्यादेशामवंति॥ एकदेशविकृतस्यानन्यत्वाज्जरशब्दस्य जरस्। निर्जरसौ। निर्जरसः। इत्यादि प
क्षे हलादौ च रामवत्॥ उपज्ञीव्यविरोधान्न जरस्। निर्जरैः। पद्दन्नोमास् हृन्निशसन्यूषन्दोषन्यक
न्शकन्नुदन्नासन्छसप्रभृतिषु। पाददन्तनासिकामासहृदयनिशाअसृज्यूषन्दोषयकृत
शकृदुदकआसन्य एषां पदादय आदेशाः स्युः शसादौ वा। [redacted] यत्तु आ
सनशब्दस्यासन्नादेश इति काशिकायामुक्तं तत्प्रामादिकमेव॥ पदः। पदौ। पादाः। पादं। पादौ।
पदः। पादान्। पदा। पादेन। इत्यादि। विश्वपाः। दीर्घाज्जसि च॥ दीर्घाज्जसि इचि च न पूर्वसवर्ण
दीर्घः। वृद्धिः। विश्वपौ। विश्वपाः। हे विश्वपाः। हे विश्वपौ। हे विश्वपाः॥ सुडनपुंसकस्य। स्वादिपं गु.न. १४
च वचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य। स्वादिष्व सर्वनामस्थाने। कण्ठ्यस्ययावधिषु

स्वादिष्वसर्वनामस्थानेषु पूर्वं पदं स्यात्॥ यचि भम्॥ यादिष्व आदिषु च कप्रत्ययावधिषु स्वा
दिष्व सर्वनामस्थानेषु पूर्वं भं स्यात्॥ आकडारादेका संज्ञा॥ इत ऊर्ध्वं कडाराः कर्मधारय इ
त्यतः प्राग् एकस्यैकैव संज्ञा ज्ञेया। या परानवकाशा च। तेन ग्रासादावपि भसंज्ञैव न पदत्वं
आतो धातोः। आकारान्तो यो धातुस्तदन्तस्य भस्याङ्गस्य लोपः। अलोन्त्यस्य। विश्वपः। विश्व
पा। विश्वपाभ्यामित्यादि। एवं शङ्खध्मादयः। धातोः किम्। हाहान्। आत इति योगवि
भागादधातोरपि क्वचित्। क्त्वः। प्नः। हरिः। हरी। जसि च। ह्रस्वान्तस्याङ्गस्य गुणः। हरयः। ह्रस्व
स्य गुणः। संबुद्धौ। हे हरे। हरिम्। हरी। हरीन्। शेषो घ्यसखि। ह्रस्वौ याविदुतौ तदन्तं स
खिवर्जं घिसंज्ञं स्यात्। आङो नास्त्रियाम्। घेः परस्याङो ना स्यादस्त्रियाम्॥ आङि ति

म॰ कौ॰ ना संज्ञा स्त्रियाम्॥ हरिणा। हरिभ्याम्। हरिभिः। घेर्ङिति। घिसंज्ञस्य ङिति सुपि गुणः। हरये
१५ हरिभ्यां। हरिभ्यः। गुणोक्तते। ङसिङसोश्च॥ एङो ङसिङसोरति पूर्वरूपमेकादेशः। ह
रेः। हरिभ्यां। हरिभ्यः। हरेः। हर्योः। हरीणाम्। अच्च घेः। इदुद्भ्यामुत्तरस्य ङेरौत् घेरन्त्। हरौ। ह
र्योः। हरिषु। एवं कव्यादयः। अनङ् सौ। सख्युरङ्गस्यानङादेशोऽसंबुद्धौ सौ। अलोऽन्त्यात्पू
र्व उपधा। सर्वनामस्थाने चासंबुद्धौ। नोपधाया दीर्घोऽसंबुद्धौ सर्वनामस्थाने। अपृक्त ए
काल्प्रत्ययः। हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्। हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च पर
सुतिसीत्येतदपृक्तं हल् लुप्यते। प्रत्ययलोपे प्रत्ययलक्षणम्। प्रत्यये लुप्तेपि तदाश्रितं गु॰ रु॰
कार्यं स्यात्॥ नलोपः प्रातिपदिकान्तस्य। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नस्य लोपः। सखा। १५

सख्युरसंबुद्धौ। सख्युरंगात्परं संबुद्धिवर्ज्जं सर्वनामस्थानं णिद्वत् स्यात्॥ अचोञ्णिति॥ अजंतांगस्य वृद्धिर्ञ्णि
ति णिति च प्रत्यये। सखायौ। सखायः। हे सखे। सखायम्। सखायौ। सखीन्। सख्या। ख्यत्यात्परस्य। खि
तिशब्दाभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उः। सख्युः २ औत्। इतः परस्य ङेरौ
ए४ त्॥ सख्यौ। शेषं हरिवत्॥ पतिः समास एव॥ घिसंज्ञः। पत्या। पत्ये। पत्युः। पत्यौ। शेषं हरिवत्॥ समा
से तु भूपतये। कतिशब्दो नित्यं बहुवचनांतः। बहुगणवतुडति संख्या। डति च। डत्यंता संख्या षट्संज्ञा स्यात्॥ षड्भ्यो लु
क्। जश्शसोः। प्रत्ययस्य लुक्श्लुलुपः॥ लुक्श्लुलुपशब्दैः कृतं प्रत्ययादर्शनं क्रमात्तत्तत्संज्ञं स्यात्॥ न
लुमताङ्गस्य। लुमता शब्देन लुप्ते तन्निमित्तमङ्गकार्यं न। कति २। कतिभिः। कतिभ्यः २ कतीनाम्। कतिषु
युष्मदस्मत्षट्संज्ञकास्त्रिषु सरूपाः॥ त्रयः। त्रीन्। त्रिभिः। त्रिभ्यः २ त्रेस्त्रयः। आमि। त्रयाणाम्। त्रिषु

मूलद्योनितंबं ५   ८३   जसिचेतिगुणे प्रा ३२

मको १६ गोराज्ञैस्त्रियश्च याराणाम्॥ त्यदादीनामः। एषामकारो विभक्तौ। आ द्विपर्यन्तानामेवेष्टिः। द्वौ २। द्वाभ्याम् ३
द्वयोः २। द्विपर्यन्तानाम् किम्। भवान्। भवन्तौ। पाति लोकमिति पपीः सूर्यः। पप्यौ २ पप्यः। हे पपीः।
पपीम्। पपीन्। पप्या पपीभ्याम्। पपीभिः। पप्ये। पपीभ्याम्। पपीभ्यः॥२। पप्यः। २ पप्योः पपीं। पपीषु
एवं वातप्रम्यादयः। बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी। यू स्त्र्याख्यौ नदी। ईदूदन्तौ नित्यस्त्रीलिंगौ न
स्पो ४ दीसंज्ञौ स्तः। प्रथमलिंगग्रहणं च। पूर्वं स्त्र्याख्यस्योपसर्जनत्वेपि नदीत्वं वक्तव्यमित्यर्थः। अम्बार्थ नद्यो
र्ह्रस्वः। संबुद्धौ। हे बहुश्रेयसि। आण्नद्याः। नद्यन्तात्परेषां ङितामाडागमः। आटश्च। आटोचि परे वृद्धिरे
कादेशः। बहुश्रेयस्यै। बहुश्रेयस्याः २ बहुश्रेयसीनां। ङेराम्नद्याम्नीभ्यः। नद्यन्तादावन्तान्नीशब्दाच्च ङे गुरुः १६
राम्। बहुश्रेयस्याम्। शेषं पपीवत्। अतिलक्ष्मीः। शेषं बहुश्रेयसीवत्। प्रधीः। अचि श्नुधातुभ्रुवां य्वो

रियङुवङौ। श्नुप्रत्ययांतस्येवर्णोवर्णांतस्य धातो भ्रू इत्यस्य चांगस्येयङुवङौ स्तो ऽजादौ प्रत्यये परे
इति प्राप्ते। एरनेकाचो ऽसंयोगपूर्वस्य। धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदंतो यो धातुस्तद
न्तस्यानेकाचो ऽङ्गस्य यणाजादौ प्रत्यये। प्रध्यौ २। प्रध्यः २। प्रध्यम्। प्रध्यः। प्रध्यि। शेषं पपीवत्। एवं ग्राम
णीः। ङौ तु ग्रामण्याम्। गतिश्च। प्रादयः क्रियायोगे गतिसंज्ञाः स्युः। गतिकारकेतरपूर्वपदस्य यण् नेष्यते
१८ शुद्धधियौ। न भूसुधियोः। एतयोरचि सुपि यण्न। सुधियौ सुधियः इत्यादि। सुखमिच्छतीति सुखीः। सुखु
सुतीः। सुख्युः। २ शेषं पृधीवत्। शंभुर्हरिवत्। एवं भान्वादयः। तृज्वत्क्रोष्टुः। असंबुद्धौ सर्वनामस्थाने। क्रो ष्टु
इत्यस्य क्रोष्टृ प्रयोक्तव्य इत्यर्थः। ऋतो ङिसर्वनामस्थानयोः। गुण इति प्राप्ते। ऋदुशनस्पुरुदंसो ऽनेहसां
च। ऋदन्तानामुशनसादीनां चानङ् स्यादसंबुद्धौ सौ। अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृ

नै।

म·सु प्रशास्तॄणाम्॥ अवादीनामुपधाया दीर्घः सं बुद्धौ सर्वनामस्थाने॥ क्रोष्टा। क्रोष्टारौ।२ क्रोष्टारः। क्रोष्टार
म्। क्रो[illegible]न्। विभाषा तृतीयादिष्वचि तृतीयादिष्वजादिषु क्रोष्टुर्वा तृज्वत्। क्रोष्ट्रा। क्रोष्ट्रे। ऋत उत्। ऋतो ङ
सिङसोरनिडदेशादेशोरप[illegible]। रात्सस्य। रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य। रस्य विसर्गः। क्रो
ष्टुः।२ क्रोष्ट्रोः।२ नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन। क्रोष्टूनाम्। क्रोष्टरि। पक्षे हलादौ।
वशं भुवत्। हूहूः। हूह्वौ। इत्यादि। अतिवमूशब्दे तु नदीकार्यविशेषः। हे अतिवमु। अतिवम्वै। अतिवम्वाः। अतिव
मूनाम्। अतिवम्वाम्। खलपूः। ओः सुपि। धात्ववयवसंयोगपूर्वो न भवति यदुवर्णस्तदन्तो नेकाचोंगस्य
यण्स्यादचि सुपि। खलप्वौ। खलप्वः। एवं सुल्वादयः। स्वयंभूः। स्वयंभुवौ। स्वयंभुवः। वर्षाभ्वश्च। वर्षाभ्वौ। अ
स्य यण्स्यादचि सुपि। वर्षाभ्वावित्यादि। दृन्भूः। दृन्करपुनःपूर्वस्य भुवो यण्वक्तव्यः। दृन्भ्वौ। दृन्भ्वः। एवं

नो येधातुस्तदे

८१

करभः। इत्यकारः। भूरादौ स्वयंभूवत्। धाता। धातारौ। धातारः। हे धातः। ऋवर्णान्नस्य णत्वं वाच्यम्। धा-
तॄणाम्। एवं नप्त्रादयः। नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थं तेनेह न। पितरौ। पितरः। पितरं। शेषं
धातृवत्॥ एवं जामात्रादयः॥ ना। नरौ। नरः। नृ च। अस्य नामि वा दीर्घः। नृणां। नृणाम्। गोतो णित्। ओ-
काराद्विहितं सर्वनामस्थानं णिद्वत्। गौः। गावौ। गावः। औतोऽम्शसोः। ओतोऽम्शसोर् आकार एकादेशः ३।४
गाम्। गावौ। गाः। गवा। गवे। गोः २। रायो हलि। अस्याकारादेशो हलि विभक्तौ। राः। रायौ। रायः। राभ्यामि-
त्यादि। ग्लौः। ग्लावौ। ग्लावः। ग्लौभ्यामित्यादि॥ ॥इत्यजन्ताः पुंलिङ्गाः॥ ॥रमा। औङ आपः। आबन्ता- आप:३
दङ्गात्परस्यौङः शी। औङ् इत्यौकारविभक्तेः संज्ञा। रमे। रमाः। संबुद्धौ च। हे रमे। हे रमाः। आङि चापः। आङि ओ-
सि चाप एकारः। रमया। रमाभ्यां। रमाभिः। याडापः। आपो ङितो याट्। रमायै। रमाभ्यां २। रमायाः २

म॰कौ॰मु रमाभ्याम्। रमायाम्। रमासु॥ एवं दुर्गाम्बिकादयः॥ सर्वनाम्नः स्याड्ढ्रस्वश्च। आबन्तात् सर्वनाम्नो ङितः स्या
डागमः स्याद्ध्रस्वश्च। सर्वस्यै। सर्वस्याः २ सर्वासाम्। सर्वस्याम्। शेषं रमावत्॥ एवं विश्वादयः। आबन्तो विभाषा
म २ दिक्समासे बहुव्रीहौ। सर्वनाम्नां वा ङसर्पूर्वस्यै। उत्तरपूर्वायै। अपुरी स्मृतो नेह। अन्तरायै नगर्यै। तीय
स्य ङित्सु वा। द्वितीयस्यै द्वितीयायै। एवं तृतीया। अम्बार्थानां ह्रस्वः। हे अम्ब। हे अक्क। हे अल्ल। असंयु
क्तायेउलकास्तद्वतां ह्रस्वो न। हे अम्बाडे। हे अम्बाले। हे अम्बिके। जरा जरसौ। जरे। इत्यादि। पक्षे हल
मतिः २ न्तवद्रमावत्। गोपा विश्वपावत्। मतिः। मत्या। ङिति ह्रस्वश्च। इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नि
त्यस्त्रीलिंगावीदूतौ ह्रस्वौ चेवर्णोवर्णौ स्त्रियां नदीसंज्ञौ। नो ङिति भ्यस्ये मतये। मत्याः २ मतेः २ गुरुः
परत्वादौ। ह्रस्वस्य आम्। नदीसंज्ञकाभ्यामिकां परस्य ङेराम्। मत्याम्। मतौ। शेषं हरिवत्। एवं बुद्ध्या

इति प्राप्ते

अवीतंन्नीतरीता। स्त्री धी ह्री श्री रमा मृड्यादयः स्त्रियां नामेव शब्दानां तु लो
योनक[illegible]वन ॥१॥

दयः। [illegible]नुरोः स्त्रियां स्त्रिसवन्नम्। स्त्रीलिंगयोरेतयोरेतौ स्तः। विभक्तौ अपिरमतः स्त्रि सवर्नस्तोः
नो रादेशोः विनु णादीर्घो। ता नाम मुवादः। स्त्रि स्वः। स्त्रिस्य्वः। २। आमि नुट्। न स्त्रिसवन्नम्। एतयोर्नो
न २ मि दीर्घो स्त्रि सर्णाम्। स्त्रिसु। हे २। नाम्नाम् ३। ह्वयोः २। गौरी। गौर्यौ। गौर्यः। गौरीम्। गौर्यौ। विभापि
एवं नद्यादयः। लक्ष्मीः। शेषं गौरीवत्। एवं नरीतंत्र्यादयः। स्त्री। हे स्त्रि। स्त्रि[illegible]यङ्‌स्तौ स्
त्ययेः। स्त्रियौ २ स्त्रियः। वाम्शसोः। अमि शशिव[illegible]। स्त्रियां इयङ्। स्त्रियम्। स्त्रीम्। स्त्रियः। स्त्रीः। स्त्रिया।
स्त्रियाः। २। परत्वान्नुट्। स्त्रीणाम्। स्त्रीषु। श्रीः। श्रियौ। श्रियः। [illegible]इयङ्‌वङ्‌स्थाना वस्त्री। इयङुवङोः स्थिति
र्ययोस्तावीदूतौ नदीसंज्ञौ न स्तो न तु स्त्री। हे श्रीः। श्रियै। श्रिये। श्रियाः २। श्रियः। वामि। इयङुवङ्स्थानौ
स्त्र्याख्यौ प्रआमि वा नदीसंज्ञौ स्तो न तु स्त्री। श्रीणां। श्रियां। श्रियि। श्रियां। धेनुर्मतिवत्। स्त्रियां वा स्त्री

म·कौ·

वाची। क्रोष्टुशब्दस्य तृज्वद्रूपं लभ्यते। ऋन्नेभ्यो ङीप्। ऋदंतेभ्यो नांतेभ्यश्च स्त्रियां ङीप्। क्रोष्ट्री गौरीवत्
भ्रूः श्रीवत्। स्वयंभूः पुंवत्। न षट्स्वस्रादिभ्यः। स्वस्रादिभ्यो ङीप् टाबौ न स्तः। स्वसा तिस्रश्चतस्रश्च ननांदा
दुहिता तथा॥ याता मातेति सप्तैते स्वस्रादय उदाहृताः॥ स्वसा। स्वसारौ। स्वसारः। माता पितृवत्। शसि
मातॄः। द्यौर्गोवत्। राः पुंवत्। नौर्ग्लौवत्॥ ॥इत्यजंताः स्त्रीलिंगाः॥ ॥अतोऽम्। अतोऽम्। अतोंऽगात् क्ली
बात् स्वमोरम्॥ ज्ञानम्। एङ्ह्रस्वादिति संबुद्धिलोपः। हे ज्ञान। नपुंसकाच्च। क्लीबादौङः शी। भसंज्ञायाम्
यस्येति च। ईकारे तद्धिते च भस्येवर्णावर्णयोर्लोपः। इत्यलोपे प्राप्ते। औङः श्यां प्रतिषेधः। ज्ञाने। ज
श्शसोः शिः। क्लीबात्। शि सर्वनामस्थानम्॥ नपुंसकस्य झलचः। झलंतस्याजंतस्य च क्लीबस्य नुमागमः। पुरुः
स्यात् सर्वनामस्थाने परे। मिदचोऽन्त्यात्परः। अचां मध्ये योऽन्त्यस्तस्मात्परस्तथैव नामावयवो मित्स्यात्॥

स्य

श्रीगणपति...

ना

उपधाया दीर्घः। धानि। पुनस्तद्वत्। शेषं पुंवत्। एवं धनवनफलादयः। अड्डतरादिभ्यः पंचभ्यः। एभ्यः क्ली
६ बेभ्यः। स्वमोरद्डादेशः। टेः। डिति परे भस्य टेर्लोपः। कतरत्। कतरे। कतराणि। हे कतरत्। शेषं पुंवत्॥
कतमत्। इतरत्। अन्यत्। अन्यतरत्। अन्यतमस्य तु अन्यतमम् इत्येव। एकतरात्प्रतिषेधः। एकतर
म्। इकोऽचि नपुंसके प्रातिपदिकस्य० अजन्तस्येत्येव। श्रीपं ज्ञानवत्॥ स्वमोर्नपुंसकात्॥ लुक्। वारि इ
को विविभक्तौ। इगन्तस्य क्लीबस्य नुम् अविविभक्तौ। वारिणी। वारीणि। नलुमतेत्यस्यानित्यत्वात्पक्षे संबुद्धि
निमित्तो गुणः। हे वारि। हे वारे। घेर्ङिति। इति गुणे प्राप्ते। वृद्धौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन
वारिणे। वारिणः। वारिणोः २ नुमचिरेति नुट्। वारीणाम्। वारिणि। हलादौ हरिवत्। तृतीयादिषु भाषित
पुंस्कं पुंवत् गालवस्य। प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगन्तं क्लीबं पुंवद्वा टादावचि। अनादयः। अ

सि॰कौ॰ नादिने इत्यादि। शेषं वारिवत्॥ यन्निमित्तमुपादाय पुंसि शब्दः प्रवर्त्तते। क्लीववृत्तितदेव स्यादुक्त
पुंस्कं तदुच्यते॥ पीलुर्वृक्षस्तत्फलं पीलु पीलुने न हि पीलवे। वृक्षो निमित्तं पीलुत्वं तज्जातत्वं तत्फले पुनः।
त तस्मै पीलुने। अत्रैपुंवत्। प्रवृत्तिनिमित्तभेदात्॥ अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः। टादावचि। अल्लो
पोऽनः। अंगावयवोऽसर्वनामस्थानयजादिस्वादिप्रत्ययपरो योऽन् तस्याकारस्य लोपः। दध्ना। दध्ने। द
ध्नः। २ दध्नोः २ विभाषा ङिश्योः॥ अंगावयवोऽसर्वनामस्थानयजादिस्वादिप्रत्ययपरो योऽन् तस्याकारस्य
लोपो वा ङिश्योः। दध्नि। दधनि। शेषं वारिवत्। एवमस्थिसक्थ्यक्षि। सुधि। सुधिनी। सुधीनि। हे सुधि
हे सुधे। सुधिया। सुधिना। सुधिये। सुधिने त्यादि। मधु। मधुनी। मधूनि। हे मधु। हे मधो। एवमन्वा उत:
दयः। सुलु। सुलुनी। सुलूनि। सुल्वा। सुलुनेत्यादि। धातृ। धातृणी। धातॄणि। हे धातः। हे धातृ। धातृ

धातस्त। धातॄणाम्। एवं ज्ञातृकर्त्रादयः। एवं ऋग्ब्रह्मादेशो। आदिश्यमानेषु बहुष्वेषु मध्ये एवः स्थाने
इगेव स्यात्। प्रघु। प्रघुनी। प्रघूनि। प्रघुनेत्यादि। प्ररि। प्ररिणी। प्ररीणि। प्ररिणा। एकदेशविकृ
तमनन्यवत्। प्रराभ्यां। प्ररीणाम्। सुनु सुनुनी। सुनूनि। सुनुनेत्यादि॥ · ॥इत्यजन्ता नपुंसक
लिंगाः॥ ॥हो ढः। हः स्याड्ढः। स्या झलि पदान्ते वा। लिट्। लिड्। लिहौ। लिहः। लिड्भ्यां। लिट्सु। लिट्
त्सु। दादेर्धातोर्घः। झलि पदान्ते चोपदेशे दादेर्धातोर्हस्य घः। एकाचो बशो भष् झषन्तस्य स्ध्वोः। धात्ववयव
वैकाचो झषन्तस्य बशो भष् से ध्वे पदान्ते च। इह व्यपदेशिवद्भावेन धात्ववयवत्वाद् भष्भावः। धुक्। धु
ग्। दुहौ। दुहः। धुग्भ्यां। धुक्षु॥ वा द्रुहमुहष्णुहष्णिहाम्। एषां हस्य वा घः। झलि पदान्ते वा। ध्रुक्। ध्रुग्।
ध्रुट्। ध्रुड्। द्रुहौ। द्रुहः। ध्रुग्भ्यां। ध्रुड्भ्याम्। ध्रुक्षु। ध्रुट्सु। एवं मुहः। धात्वादेः षः सः। स्नुट्॥

न

स्नुह्। स्नुक्। स्नुग्। एवं स्निह्। इग्यणः संप्रसारणम्॥ यणः स्थाने प्रयुज्यमानो इक् संप्रसारणसं
ज्ञः स्यात्। वाह ऊठ्। भस्य वाहः संप्रसारणम् ऊठ्। संप्रसारणाच्च। संप्रसारणादचि पूर्वरूपमेकादे
शः। एत्येधत्यूठ्सु। विश्वौहः इत्यादि। चतुरनडुहोरामुदात्तः। सर्वनामस्थाने। सावनडुहः नुम्। आ॰। नद्यो
रिति सूत्रादादित्यधिकारादवर्णात्परोयं नुम्। अतो विशेषविहितेनापि नुमा आम्न बाध्यते। अमाव
नुम् न बाध्यते। सुलोपः। संयोगान्तस्य लोपः। नुम्विधिसामर्थ्याद्वसुस्रंस्विति दत्वं न। संयोगान्तलो
पस्यासिद्धत्वान्नलोपो न। अनड्वान्। अम् संबुद्धौ। चतुरनडुहोः॰ हे अनड्वन्। अनड्वाहौ। अनडु
हः। वसुस्रंसुध्वंस्वनडुहां दः। सांतवस्वं। नस्य स्वं स्वादेश स्यात् पदांते। अनडुद्भ्यामित्यादि। पदां
ते किम्। स्रस्तं। ध्वस्तम्॥ सहेः साडः सः। साडूपस्य सहेः सस्य मूर्द्ध[illegible]न्यादेशः। तुराषाट्। तुरासा

गुरुः

सो।नुराषाङ्गामित्यादि।दिव औत्।दिव इति प्रातिपदिकस्य औः स्यात् सौ।सुद्यौः।द्युदिवौ।दिवउत्पदां
ते०सुद्युभ्यामित्यादि।चत्वारः।चतुरः।चतुर्भिः।चतुर्भ्यः।२।षट्चतुर्भ्यश्च।२।एभ्य आमो नुडागमः।रषाभ्यां
नो णः समानपदे।चतुर्णाम्।रो सुपि।रो रेफो विसर्जनीयः सुपि।चतुर्षु।मो नो धातोः।पदांते।प्रशान्।
प्रशान्तौ।किमः कः विभक्तौ।कः।कौ।के इत्यादि।इदमो मः सौ।त्यदाद्यत्वापवादः।इदमोऽयं पुंसि।इदम
इदोऽय् सौ पुंसि।अयम्।त्यदाद्यत्वे अतो गुणे।अपदांतात् अतो गुणे पररूपमेकादेशः।२।इदमो दस्य
मः स्याद्विभक्तौ।इमौ।इमे।त्यदादीनां सर्वो अनेनाकृतीनुत्सर्गः।अनाप्यकः।अकारस्य इदम इदोऽना
पि विभक्तौ।आपि इति प्रत्याहारः।अनेन।हलि लोपः।अकारस्य इदम इदो लोपः आपि हलादौ।नानर्थ
केऽलोऽन्त्यविधिरनभ्यासविकारे।आद्यन्तवदेकस्मिन्।एकस्मिन् क्रियमाणं कार्यं आदाविवांतद्

म·कौ· वस्मात्। सुपिचेति दीर्घः। आभ्याम्। ३। नेदमदसोरकोः। अककारयोरिदमदसोर्भिस ऐस् न स्यात्। ए
भिः। अस्मै। एभ्यः। २। अस्मात्। अस्य। अनयोः। २। एषाम्। अस्मिन्। एषु। द्वितीयाटौस्स्वेनः। इदमेतदो
रन्वादेशे। किंचित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः। यथा। अनेन व्याकर
णमधीतमेनं छन्दोऽध्यापयेति। अनयोः पवित्रं कुलमेनयोः प्रभूतं स्वमिति। एनम्। एनौ। एनान्। एनेन।
एनयोः। २। राजा। नाङिसंबुद्ध्योः। नस्य लोपो न ङौ संबुद्धौ च। हे राजन्। ङावुत्तरपदे प्रतिषेधः। ब्रह्मनिष्ठः। रा
जानौ। २। २। राजानः। राजानम्। राज्ञः। न लोपः सुप्स्वरसंज्ञातुग्विधिषु कृति। सुप्विधौ स्वरविधौ संज्ञावि
धौ कृति तुग्विधौ च नलोपोऽसिद्धो नान्यत्र। राजाश्व इत्यादौ। इत्यसिद्धत्वादात्वमेत्वमैस्त्वं च न। राजभ्या गुरुः
राजभिः। राजभ्यः। राज्ञि। राजनि। यज्वा। यज्वानौ। यज्वानः। न संयोगाद्वमन्तात्। वमान्तसंयोगादनो

२२

कारस्य लोपो न ० यज्वनः । यज्वभ्याम् । ब्रह्मशाः । ब्रह्मणां । इन्हन्पूषार्यम्णां शौ । एषां शावेवोपधाया दी
र्घो नान्यत्र । इति निषेधे प्राप्ते । सौ च । इन्नादीनामुपधाया दीर्घः स्यात् असंबुद्धौ सौ । वृत्रहा । हे वृत्रहन् । एकाजु
त्तरपदे णः । एकाजुत्तरपदं यस्य तस्मिन्समासे पूर्वपदस्थान्निमित्तान्नस्य प्रातिपदिकान्तनुम्विभक्ति
स्थस्य नस्य णत्वं स्यात् । वृत्रहणौ । वृत्रहणः । हो हन्तेर्ञ्णिन्नेषु । ञिति णिति प्रत्यये नकारे च परे हन्तेर्हस्य कुत्वं
स्यात् । हन्तेरुपसर्गस्थान्निमित्तादेतेर्तस्य णः । प्रहण्णात् ॥ अत्पूर्वस्य । हन्तेरत्पूर्वस्यैव नस्य णो नान्यस्य । प्र
घ्नंति । योगविभागसामर्थ्यादत्र नकारस्य विधिर्वा भवति प्रतिषेधो वेति । न्यायत्वाधिक्याक्रमति वेतिसो
पि निवर्तते । वृत्रघ्न इत्यादि । एवं शार्ङ्गिन् यशस्विन् अर्यमन् पूषन् । मघवा बहुलम् । मघवन् शब्दस्य वा
तृ इत्यन्तादेशः । ऋ इत् उगित् । उगिदचां सर्वनामस्थानेऽधातोः । उगितो नलोपिनो ऽञ्चतेश्च नुम्स्यात्सर्वनामस्था

म.कौ. नेमघवान्। उपधादीर्घे कर्त्तव्ये संयोगांतलोपस्यासिद्धत्वेन भवति न दु[illegible]लघ्नहरणात्॥ मघवंतौ। मघवं
तः। मघवन्शब्दमात्रत्वाभावे सुटि राजवत्। श्वयुवमघोनामतद्धिते। अन्नन्तानां भानामेषामतद्धिते परे
संप्रसारणं स्यात्। मघोनः। मघवभ्याम्। ० एवं श्वन् युवन्। नसंप्रसारणे संप्रसारणं॥ यूनः। युवभ्या
४ अः मित्यादि॥ अर्वा। हे अर्वन्। अर्वणस्त्रसावनञः। नञा रहितस्यार्वन्नंतस्यांगस्य तृ इत्यंतादेशो न तु सौ। ०
अर्वंतौ। अर्वंतः। अर्वद्भ्याम्। पथिमथ्यृभुक्षामात्। सौ। इतोऽत्सर्वनामस्थाने। पथ्यादेः। थो न्थः। पथिम
थोः थस्य न्थादेशः सर्वनामस्थाने। पंथाः। पंथानौ। पंथानः। भस्य टेर्लोपः। भस्य पथ्यादेष्टिलोपः। पथः। पथि
भ्याम्। पथिभ्यः। एवं मंथाः। ऋभुक्षाः। पंचन्। ष्णांता षट्। षांता नांता च संख्या षट्संज्ञा। पञ्च। पञ्चभिः। पं
चभ्यः। ५ नुट्। नोपधायाः। नांतस्योपधाया दीर्घो नामि। पंचानां। पंचसु॥ अष्टन आ विभक्तौ। हलादौ पु

वा। अष्टाभ्यः औश्। कृताकारादष्टनो जश्शसोरौश्। अष्टभ्य इति वक्तव्ये कृतात्वनिर्देशाज्जश्शसोर्विषये
आत्वं ज्ञापयति। अष्टौ २। अष्टाभिः। अष्टाभ्यः २। अष्टानां। अष्टासु। आत्वाभावे। अष्टपंचवत्। ऋत्विक्
दधृक्स्रग्दिगुष्णिगंच्युयुजिक्रुंचां वा। एभ्यः क्विन्। अंचेः सुप्युपपदे। युजिक्रुंचोः केवलयोः। क्रुंचेर्नलो
पाभावश्च निपात्यते। क्विनाविति। कृदतिङ्। अत्र धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञः। वेरपृक्तस्य।
लोपः। क्विन्प्रत्ययस्य कुः। क्विन्प्रत्ययो यस्मात्तस्य कवर्गोऽन्तादेशः पदांते। ऋत्विक्। ऋत्विग्। ऋत्विजौ
ऋत्विग्भ्याम्। ३। युजेरसमासे। सर्वनामस्थाने नुम्। लोपः। संयोगांतस्य लोपः। कुत्वे नन्स्य ङः। युङ्
युंजौ। युंजः। युग्भ्याम्। असमासे किं। चोः कुः। चवर्गस्य कवर्गः स्यात् झलि पदांते वा। सुयुक्। २। सुयुजौ।
युग्भ्याम्। खन्। खंजौ। खंजः। खंभ्याम्। व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः। झलि पदां

स्प२

२६ म·कौ· नेव॥ जश्त्वचर्त्वे॰ राट्। राड्। राजौ। राजः। राड्भ्याम्। एवं विभ्राट्। देवेट्। विश्वसृट्। परिमृट्। परौ व्रजेः ष
पदान्ते परावुपपदे व्रजेः क्विप् दीर्घश्च पदान्ते षत्वमपि। परित्यज्य सर्वं व्रजतीति परिव्राट्। परिव्राजौ। विश्व
स्य वसुराटोः। विश्वेदीर्घस्याद्वसौ राट्शब्दे च परे। विश्वाराट्। विश्वाराजौ। विश्वाराड्भ्यामित्यादि। स्कोः संयो
गाद्योरन्ते च॥ पदान्ते झलि च यः संयोगस्तदाद्योः सकारककारयोर्लोपः। भृट्। सस्य श्चुत्वेन शः। झ
लां जश् झशि। इति शस्य जः। भृज्जौ। भृड्भ्याम्। त्यदाद्यत्वं पररूपत्वम्। तदोः सः सावनन्त्ययोः। त्यदा
दीनां तदकारयोरनन्त्ययोः सः स्यात्सौ। स्यः। त्यौ त्ये। तौ। ते। यः। यौ। ये। एषः। एतौ। एते। एनं। एनौ। स२
एनान्। एनेन। एनयोः। ङेप्रथमयोरम्। युष्मदस्मद्भ्यां परस्य ङे प्रथमाद्वितीययोश्च अमादे गुरुः
शः। मपर्यन्तस्येत्यधिकृत्य। त्वाहौ सौ। अनयोर्मपर्यन्तस्य। शेषे लोपः। एतयोष्टिलोपः। त्वम्। अहम् २६

युवावौ द्विवचने। द्वयोरुक्तावनयोर्मपर्यंतस्य युवावौ स्तो विभक्तौ। प्रथमायाश्च द्विवचने भाषाया
म्। औङ्येनयोरात्वं लोको युवाम्। २ आवाम्। २। यूयवयौ जसि। अनयोर्मपर्यंतस्य यूयवयौ। यूयं वयम्। त्व म २
मावेकवचने। एकस्योक्तावनयोर्मपर्यंतस्य विभक्तौ। द्वितीयायां च। अनयोरात्। त्वाम्। माम्। श
सो नः। आभ्यां शसो नः स्यादमोऽपवादः। आदेः परस्य। संयोगांतस्य लोपः। युष्मान्। अस्मान्। यो ऽचि। अ
नयोर्यादेशो ऽनादेशे ऽजादौ विभक्तौ। त्वया। मया। युष्मदस्मदोरनादेशे। अनयोरात्स्यादनादेशे ह
लादौ विभक्तौ। युवाभ्याम्। आवाभ्याम्। युष्माभिः अस्माभिः। तुभ्यमह्यौ ङयि। अनयोर्मपर्यंतस्य
टिलोपः। तुभ्यम्। मह्यम्। भ्यसो ऽभ्यम्। आभ्यां परस्य। युष्मभ्यम्। अस्मभ्यम्। एकवचनस्य वा। आ
भ्यां परस्य ङसेरत्। त्वत्। मत्। पंचम्या अत्। आभ्यां भ्यसः। युष्मत्। अस्मत्। तवममौ ङसि। अनयो

म: कौ·

मपर्यन्तस्य युष्मदस्मदोः ॥ सौ ७।२।० न चेमस्य युवयोः । आवयोः साम आकम् । आभ्याम् । साम आ
कं ॥ युष्माकम् अस्माकम् । त्वयि । मयि । युष्मासु । अस्मासु । युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थ
योर्वान्नावौ । पदात्परयोरपादादौ स्थितयोः षष्ठ्यादिविशिष्टयोर्वान्नावौ । बहुवचनस्य वस्नसौ ८।
१ उक्तविधयोरनयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः । तेमयावेकवचनस्य ८।१ उक्तविधयोः षष्ठीचतु
र्थ्येकवचनान्तयोस्तेमे स्तः । त्वामौ द्वितीयायाः ८।१ उक्तविधयोर्द्वितीयैकवचनान्तयोस्त्वामौ स्तः
श्रीशस्त्वावतु मापीह दत्तात्ते मेऽपि शर्म सः । स्वामी ते मेऽपि स हरिः पातु वामपि नौ विभुः ॥ १ ॥ सुखं वां
नौ ददात्वीशः पतिर्वामपि नौ हरिः । सोऽव्याद्वो नः शिवं वो नो दद्यात्सेव्योऽत्र वः स नः ॥ २ ॥ एकवा
क्ये निघातयुष्मदस्मदादेशा वक्तव्याः ॥ एकतिङ् वाक्यम् । तेनेह न । ओदनं पच तव भविष्यति । इह

गु:

२५

नुस्मादेव॥ शालीनां ते ओदनं दास्यामि॥ एते वांनावादय आदेशाः अनन्वादेशे वा वक्तव्याः। अन्वा
देशे तु नित्यं स्युः। धाता ते भक्तोस्ति तव भक्तोस्तीति वा। तस्मै ते नमः इत्येव। नचवाहाहैवयुक्ते। वादि
पंचकयोगे नैते आदेशाः स्युः। हरिस्त्वां मां च रक्षतु॥ कथं त्वां मां वा न रक्षेदित्यादि॥ पश्यार्थैश्चान
लोचने॥ अचाक्षुषज्ञानार्थैर्धातुभिर्योगे नैते आदेशाः स्युः। चेतसा त्वां समीक्षते। आलोचने तु भक्त
स्त्वां पश्यति चक्षुषा॥ सपूर्वायाः प्रथमाया विभाषा॥ विद्यमानपूर्वात् प्रथमांताद् अन्वादेशेप्यादेशा वा
स्युः। भक्तस्तवमप्यहं तेन हरिस्त्वां त्रायते स मां त्वामेति वा। सामंत्रितम्॥ संबोधने या प्रथमा तद्
तमामंत्रितसंज्ञः॥ आमंत्रितं पूर्वमविद्यमानवत्॥ अग्ने तव॥ देवास्मान्पाहि॥ नामंत्रिते समानाधिक
रणे सामान्यवचनम्॥ विशेषणसमानाधिकरणे आमंत्रिते परे नाविद्यमानवत्॥ हरे दयालो न

म कौ ·

पाहि [illegible] सुपात्। सुपा-
पादः पत्। पाच्छब्दांतं यदंगं भं तदवयवस्य पाच्छब्दस्य पदादेशः। सुपदः। सुपाद्भ्याम्। अग्निमत्। अ-
ग्निमथौ। अग्निमद्भ्याम्। अनिदितां हल उपधायाः क्ङिति। हलंतानाम् अनिदिताम् अंगानाम् उपधाया
नस्य लोपः किति ङिति। नुम् तयोर्गांतस्य लोपः। नस्य कुत्वेन ङः। प्राङ्। प्राञ्चौ। प्राञ्चः। अचः। लुप्तनका-
रस्यांचतेर्भस्याकारस्य लोपः। चौ। लुप्ताकारस्य अकारे च तौ परे पूर्वस्याणो दीर्घः। प्राचः। प्राग्भ्याम्। प्र-
त्यङ्। प्रत्यञ्चौ। प्रतीचः। प्रत्यग्भ्याम्। उदङ्। उदञ्चौ। उद ईत्। उच्छब्दात्परस्य लुप्तनकारस्यांचतेर्भस्या-
कारस्य ईत्। उदीचः। उदग्भ्याम्। समः समि। वप्रत्ययांते च तौ समः समिः। सम्यङ्। सम्यञ्चौ। स- गुरुः
मीचः। सम्यग्भ्याम्। सहस्य सध्रिः। तथा। सध्र्यङ्। तिरसस्तिर्यलोपे। अलुप्ताकारे च तौ च प्र-

कु॰

त्ययांते तिरसस्तिर्यादेशः। तिर्यङ्। तिर्यञ्चौ। तिरश्चः। तिरश्चा। तिर्यग्भ्यां। नाञ्चेः पूजायाम्। पूजा
र्थस्याञ्चतेरुपधाया नस्य लोपो न। प्राङ्। प्राञ्चौ। नलोपाभावादचोपो न। प्राञ्चः। प्राङ्भ्याम्। प्राङ्
षु। प्राङ्क्षु।। एवं पूजार्थे प्रत्यङ्ङादयः। क्रुङ्। क्रुञ्चौ। क्रुञ्चः। क्रुङ्भ्याम्। पयोमुक्। पयोमुचौ। पयो
मुचः। पयोमुग्भ्याम्। महत् पूजायां। वर्तमाने पृषन्महद्बृहज्जगच्छतृवच्च। एते निपात्यंते। शतृवद्भा
वात्कार्यं स्यात्। उगित्वान्नुम्। सांतमहतः संयोगस्य। सांतसंयोगस्य महतश्च यो नकारस्तस्योपधा
या दीर्घोऽसंबुद्धौ सर्वनामस्थाने। महान्। महांतौ। महांतः। हे महन्। महतः। महद्भ्याम्। अत्वसंत
स्य चाधातोः। अत्वंतस्योपधाया दीर्घो धातुभिन्नासंतस्य चासंबुद्धौ सौ। धीमान्। धीमंतौ। धीमं
तः। हे धीमन्। शसादौ महत्वत्। भातेर्डवतुः। डित्वसामर्थ्यादभस्यापि टेर्लोपः। भवान्। भवंतौ। भ

म·को·
ददत्२

अ १

त्वंतस्यतुभवत्॥ उभेऽभ्यस्तम्॥ षाष्ठद्वित्वप्रकरणेयेद्वेविहितेउभेसमुदितेअभ्यस्तसंज्ञेस्तः॥ नाभ्यस्ता
च्छतुः॥ नुम्न। ददत्। ददतौ॥ जक्षित्यादयःषट्॥ षट्धातवोऽन्येजक्षितिश्चसप्तमएतेअभ्यस्तसं
ज्ञाःस्युः॥ जक्षत्॥ जक्षतौ॥ जक्षतः। एवंजाग्रत्। दरिद्रत्। शासत्। चकासत्। दीधीङ्दीधिदेवन
योः। वेवीङ्वेतिनातुल्ये। अच्छन्दसि। दीध्यत्। वेव्यत्॥ जक्षिजागृदरिद्राशास्दीधीङ्वेवीङ्
चकास्तथा॥ अभ्यस्तसंज्ञाविज्ञेयाधातवोमुनिभाषिताः॥ १॥ गुप्। गुपौ। गुपः। गुब्भ्यां। त्यदादिषुदृ
शोऽनालोचनेकञ्च। त्यदादिषूपपदेषु। अज्ञानार्थाद्दृशेर्धातोःकञ्स्याच्चात्क्विन्। आसर्वनाम्नः। दृ
दृशावतुषु। तादृक्। तादृशौ। तादृशः। तादृग्भ्यां॥ व्रश्चेतिषः॥ जस्त्ववर्त्वे। विट्विशौ॥ विशः। विड्भ्यां
म्। नशेर्वा। नशेःकवर्गोन्तादेशोवापदान्ते। नक्। नट्। नशौ। नशः॥ नग्भ्याम्। नड्भ्याम्। स्पृशोऽनुद

गुरुः
२१

केनचित्। अनुदके स्पृशेः पदे स्पृशेः क्विन्। घृतस्पृक्। घृतस्पृशौ। घृतस्पृशः। दधृक्। दधृषौ।
दधृषः। दधृग्भ्यां। रत्नमुट्। रत्नमुषौ। रत्नमुषः। रत्नमुड्भ्याम्। षट्। षड्। षड्भिः। षड्भ्यः। ष
ण्णाम्। षट्सु। यत्नुप्रावाष्ठ स्नामि। नुपाहृतं तस्मात् आदिकमेव। उपायेनिस्पवबनात्। वी
रुपधायाः दीर्घ इकः। रेफवांतस्य धातोरुपधायाः इकोदीर्घः पदांते। पिपठीः। पिपठिषौ। पिपठि
षः। पिपठीर्भ्याम्। नुम्विसर्जनीयशर्व्यवायेपि। सतेः मस्ते कं लघवधाने पिः। कुष्योपरस्य सस्य
मूर्धन्यादेशः। ष्टुत्वेन पूर्वस्य षः। पिपठीष्षु। पिपठीःषु। चिकीः। चिकीर्षौ। चिकीर्षः। चिकीर्षु। विद्वा
न्। विद्वांसौ। हे विद्वन्। वसोः संप्रसारणम्। वस्वंतस्य भस्य संप्रसारणम्। विदुषः। वसुस्रं
स्विति दत्वौ। विद्वद्भ्याम्। पुंसोऽसुङ्। सर्वनामस्थाने। पुमान्। हे पुमन्। पुमांसौ। पुंसः। पुंसा।

२८ म·को·

पुंभ्यां। पुंसु। अड् स्थाने स्यनङ्। उशनां। उशनसौ। अस्य संबुद्धौ वा नङ् नलोपश्च वा वाच्यः। हे उशन
हे उशनन्। हे उशनः। उशनोभ्यां। अनेहा। अनेहसौ। अनेहसः। हे अनेहः। वेधाः। वेधसौ। वेध
सः। वेधोभ्यां। अदस औ सुलोपश्च। सो परे तदोरिति सः। असौ। औत्वप्रतिषेधः साकच्कस्य
वा वक्तव्यः। साद्युत्वं च। असकौ। असुकः। त्यदाद्यत्वं पररूपत्वं वृद्धिः। अदसोऽसेर्दादु दो मः। अदसो
ऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च। आन्तरतम्याद्ध्रस्वस्य उः दीर्घस्य ऊः। अमू। जसः शी। गुणः
एत ईद्बहुवचने। अदसोऽसान्तस्य दात्परस्य एत ईद् दस्य च मो बह्वर्थोक्तौ। अमी। पूर्वत्रासिद्धमिति विभ
क्तिकार्यं प्राक्। पश्चादुत्वमत्वे। अमुम्। अमू। अमून्। मुत्वे कृतेऽपि घिसंज्ञायां नाभावः। न मु ने। गुरुः
नाभावे कृते ऽत्वमुभावो नासिद्धः। अमुना। अमूभ्याम्। अमीभिः। अमुष्मै। अमीभ्यः २। अमु २८

क्लीबं ७ सर्व २

अमुष्मात्। अमुष्य: अमुयोः २ अमीषां· अमुष्मिन्। अमीषु॥ ॥इति हलंताः पुल्लिंगाः॥ ॥

नहो धः। झलि पदांते। नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ। क्विबंते पूर्वस्य दीर्घः। उपानत् रु २

उपानद्· उपानहौ· उपानहः। उपानद्भ्याम्। उपानत्सु। क्विन्नंतत्वात्कुत्वेन हस्य घः। उष्णिक्। उष्णिहौ।

उष्णिहः। उष्णिग्भ्यां। द्यौः। दिवौ। दिवः। द्युभ्याम्। गीः। गिरौ। गिरः। गीर्षु। एवं। पूः। पुरौ। पुरः। चतस्रः २

चतसृभिः। चतसृभ्यः २ चतसृणाम्। चतसृषु। का। के। काः। सर्ववत्। यः सौ। इदमो दस्य। इयं त्यदा

द्यत्वे टाप्। दश्चेति मः। इमे। इमाः। इमाम्। इमे। इमाः। अनया। हलि लोपः। आभ्याम्। आभिः। अस्यै

अस्याः। अनयोः। आसाम्। अस्यां। आसु। स्रक्। स्रजौ। स्रजः। स्रग्भ्याम्। त्यदाद्यत्वे टाप्। स्या। त्ये

त्याः। एवं तत्। यत्। एतत्। वाक्। वाचौ। वाचः। वाग्भ्याम्। अप्शब्दो नित्यं बहुवचनांतः। अप् स्त्

म॰कौ॰

त्रिति दीर्घः। आपः॰ अपः अपोभिः अपस्तकारो भादौ प्रत्यये॰ अद्भिः अद्भ्यः। अपाम्। अप्सु। दिक्। दि
ग्। दिशौ। दिशः। दिग्भ्याम्। त्यदादिष्विति। दृशेः क्विन्विधानादन्यत्रापि कुत्वम्। दृक्। दृशौ। दृशः।
दृग्भ्याम्। त्विट्॰ त्विषौ। त्विषः। त्विड्भ्याम्। स सजुषेति रुत्वम्। सजूः सजुषौ। सजुषः। सजूर्भ्याम्
आशीः॰ आशिषौ॰ आशिषः आशीर्भ्याम्॰ असौ॰ उत्वमत्वे॰ अमू॰ अमूः॰ अमूम्॰ अमूः॰ अमुया॰ अमू
भ्याम्॰ अमूभिः॰ अमुष्यै॰ अमूभ्यः २ अमुष्याः॰ अमुयोः॰ अमूषाम्॰ अमुष्याम्॰ अमुयोः॰ अमूषु॥ ॥
॥ ॥इति हलंताः स्त्रीलिंगाः। ॥स्वमोर्लुक्॰ दत्वं॰ स्वनडुत्॰ स्वनडुही॰ चतुरनडुहोरित्याम्॰
स्वनडुांहि॰ पुनस्तद्वत्। वाः॰ वारी॰ वारि। वारा॰ वार्भ्याम्॰ चत्वारि॰ किं॰ के॰ कानि॰ इदम्॰ इमे॰ इमा हरः
नि॰ अन्वादेशे नपुंसके एनद्वक्तव्यः॰ एनत्॰ एने॰ एनानि॰ एनेन॰ एनयोः॰ व्योम॰ व्योमनी॰ व्योमा

गवाग श्वदस्य ह्यपा [illegible] थैवा गाति भेदत॥ असन्ध्यवङ् पूर्वरू
पेनवा धिकृ गते मतम्॥१॥

ग्र. ८

नि· ब्रह्म० संबुद्धौ नपुंसकानां नलोपो वा वाच्यः· हे ब्रह्म· हे ब्रह्मन्· हे ब्रह्मणी· हे ब्रह्माणि· ब्रह्मणा·
रोः सुपि· अहः· विभाषा ङिश्योः· अह्नी· अहनी· अहानि· अहन्· अहनित्यस्य रुः पदान्ते· अहोभ्यां
दण्डि· दण्डिनी· दण्डीनि· सुपथि· टिलोपः· सुपंथानि· ऊर्क्· ऊर्जी· ऊर्न्जि· नरजानां संयोगः· त्यत्
त्ये· त्यानि· तत्· ते· तानि· यत्· ये· यानि· एतत्· एते· एतानि· गवाक्· गोची· गवांचि· पुनस्तद्व
त्· गोचा· गवाग्भ्याम्· शकृत्· शकृती· शकृंति· शकृद्भ्याम्· ददत्· ददती· वा नपुंसकस्य· अभ्यस्ता
त्परो यः शतुरवयवस्तदन्तस्य क्लीबस्य वा नुम् स्यात् सर्वनामस्थाने· ददंति· ददति· तुदत्· आच्छीनद्योर्नु
म्· अवर्णान्तात्परो यः शतुरवयवस्तदन्तस्य नुम्वा शीनद्योः· तुदंती· तुदती· तुदंति· भात्· भाती· भां
ति· पचत्· शप्श्यनोर्नित्यम्· शप्श्यनोरात्परो यः शतुरवयवस्तदंतस्य नुम् शीनद्योः परयोः· प

स्वन्सु पुंसु नव बट्_भादौ षड्कु सुह्री [illegible] सौ॥ चत्वारि झेबे दशाके
रूपा [illegible] ति वि भावय॥८॥

स·को·

वंती दीव्यत्· दीव्यंती· धनुः धनुषी· सांतेति दीर्घः नुम्विसर्जनीयेनिषः धनूंषि· धनुषा· धनुर्भ्याम्
एवंचक्षुर्हविरादयः पयः पयसी· पयांसि· पयोभ्याम्· सुपुम्· सुपुंसी· सुपुमांसि· अदः विभक्तिका
र्यम्· उत्वमत्वे· अमु· अमूनि· शेषं पुंवत्॥ ॥इति हलंतानपुंसकलिंगाः॥ ॥स्वरादिनिपा
तमव्ययम्। स्वर्· अंतर्· प्रातर्· पुनर्· सनुतर्· उच्चैस्· नीचैस्· शनैस्· ऋधक्· ऋते· युगपत्·
आरात्· पृथक्· ह्यस्· श्वस्· दिवा· रात्रौ· सायम्· चिरम्· मनाक्· ईषत्· जोषम्· तूष्णीं· वहिस्· आव
स्· समया· निकषा· स्वयं· वृथा· नक्तं· नञ्· हेतौ· इद्धा· अद्धा· सामि· वत्· ब्राह्मणवत्· क्षत्रियव
त्· सना· सनत्· सनात्· उपधा। तिरस्· अंतरा· अंतरेण· ज्योक्· कम्· शम्· सहसा· विना· ना
ना· स्वस्ति· स्वधा· अलं· वषट्· श्रौषट्· वौषट्· अन्यत्· अस्ति· उपांशु· क्षमा· विहायसा· दोषा·

पु·स·
२०

मृषा·मिथ्या·मुधा·पुरा·मिथो·मिथस्·प्रायस्·मुहुस्·प्रवाहुकम्·प्रवाहिका·आर्यहलम्·अ
भीक्ष्णम्·साकम्·सार्द्धम्·नमस्·हिरुक्·धिक्·अथ·[illegible]·अम्·आम्·प्रतां·प्रशाम्·प्रशा
न्·मा·माङ्।आकृतिगणोऽयम्·च·वा·ह·अह·एव·एवं·नूनं·शश्वत्·युगपत्·कूपत्·सूपत्·कु
वित्·नेत्·चेत्·चण्·यत्रे·कच्चित्·नह·हंत·माकि·माकीम्·नकी·नकीम्·माङ्।नञ्·यावत्·तावत्
त्वै·द्वै·न्वै·रै·श्रौषट्·वौषट्·स्वाहा·स्वधा·अलं·वषट्·तुम्·तथाहि·खलु·किल·अथ·सुष्टु·स्म
आदह·उपसर्गविभक्तिस्वरप्रतिरूपकाश्च·अवदत्तं·अहंयुः·अस्ति।क्षीरा·अ·आ·इ·ई·उ·
ऊ·ए·ऐ·ओ·औ·पशु·शुकं·यथा·कथा·च·पाट्·प्याट्·अंग·है·हे·भोः·अये·द्य·विषु·एकप
दे·युत्·आतः·चादिरप्याकृतिगणः·तद्धितश्चासर्वविभक्तिः।यस्मात्सर्वाविभक्तिर्नोत्पद्यते सत

३१
अ·को·
३१

ङितौ तौ ऽव्ययं स्यात् परिगणनं कर्तव्यं ॥ तसिलादयः प्राक् पाशपः शस्प्रभृतयः प्राक् समासान्तेभ्यः
अम् आम् कृत्वोर्थाः तसिवती नानाञौ एतदंतमप्यव्ययं अलंकारादि कृन्मेजन्तः कृघो मांत एजं
तश्च तेदंतमप्यव्ययं । स्मारं स्मारं नमति शिवं । जीवसे । पिबध्यै । क्त्वातोसुन्कसुनः एतदंतमप्यव्ययम् कृत्वा उदेतोः
विसृपः अव्ययीभावश्च अधिहरि अव्ययादाप्सुपः अव्ययाद्विहितस्याप्सुपश्च लुक् तत्र शालायां
यां अथ विहितविशेषणात् नेह अमुष्मै अव्ययसंज्ञायां यदि [illegible] पेन तदन्तविधिरस्ति तथापि नमो ध ४
रा· आप् ग्रहणं व्यर्थं अव्ययस्यालिंगत्वात् तथा च श्रुतिः सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ १ ॥ वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः आपं चैव हल गुरुः
न्तानां यथा वाचा निशा दिशा ॥ २ ॥ अवगाहः वगाहः ॥ अपिधानं पिधानम् ॥ ॥ इत्यव्ययानि ॥ श्री

३२